# निबन्धलेखनम:।

कमपि एकं विषयम् अधिकृत्य पञ्चवाक्यत्मकं निबन्धं लिखत।

## उत्सवा:।

१. **महाराष्ट्रदिनम्।**

महाराष्ट्राभिख्यो मधुरजलसान्द्रो निरुपमः।
प्रकाशो देशोऽयं सुरपुरनिकाशो विजयते।।

मेमासस्य प्रथमे दिवसे शून्यषण्णवैकतमे ख्रिस्ताब्दे (१९५०) महाराष्ट्रराज्यं निर्मितम्। तदा 'मुम्बईनगर्या सह संयुक्तं महाराष्ट्रराज्यं भवतु' इत्यर्थं संयुक्त-महाराष्ट्र-अभियानं प्राचलत्। एतद् दिनं 'महाराष्ट्रदिनम्' इति मान्यते।

अस्मिन् दिने महाराष्ट्रराज्ये अवकाशः भवति। नैकेषु आवाससंकुलेषु पूजाः सम्पद्यन्ते। जनाः महाराष्ट्रगौरवगीतानि गायन्ति। मुम्बईनगर्यां शिवाजी-उद्याने सैनिकानां सञ्चलनं भवति। तद् द्रष्टुं जनानां सम्मर्दः भवति। तत्र विविधाः चित्ररथाः महाराष्ट्रस्य गौरवपरम्पराणां प्रदर्शनं कुर्वन्ति। राज्यपालमहोदयः भाषणं करोति।

विजयताम् अस्माकं महत् राष्ट्रम्।

२. **गणेशोत्सवः।**

सर्वेषां प्रियः श्रीगणेशः विद्यायाः देवता। सः विघ्नहर्ता सुखकर्ता च। अस्माकं महाराष्ट्रराज्ये भाद्रपदमासस्य शुद्धपक्षे चतुर्थ्यां गणेशोत्सवः उत्साहेन सम्पद्यते।

जनाः गणेशस्य मूर्तिं स्वगृहे स्थापयन्ति। प्रतिदिनं प्रातः सायङ्काले च तस्य पूजां कुर्वन्ति। रक्तवर्णानि कुसुमानि, दुर्वाङ्कराः शमीपत्राणि च तस्य प्रियाणि। मोदकाः तस्मै अतीव रोचन्ते। अतः तस्मै एकविंशतिमोदकानां नैवेद्यं समर्पयन्ति। दशमे दिने अनन्तचतुर्दश्यां तस्य विसर्जनं भवति।

लोकमान्यतिलकमहोदयः सार्वजनिकं गणेशोत्सवं प्रारब्धवान्। तस्य उद्दिष्टं सामाजिकी एकता एव अस्ति। गणेशोत्सवः मह्यम् अतीव रोचते। वयं सदैव गणेशस्य प्रार्थनां कुर्महे –

वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा।।

३. **दीपावली ।**

सर्वेषु उत्सवेषु दीपावली भारतीयानां लोकप्रियः उत्सवः इति जानन्ति सर्वे। आश्विनमासस्य कृष्णद्वादशीतः कार्तिकमासस्य शुद्धद्वितीयापर्यन्तम् एषः उत्सवः उत्साहेन सम्पद्यते। धनत्रयोदशी, नरकचतुर्दशी, अमावस्यां लक्ष्मीपूजनं, बलिप्रतिपदा, यमद्वितीया च अस्य उत्सवस्य विविधाः अङ्गाः।

एतस्मिन्नुत्सवे जनाः प्रातः अतिशीघ्रम् उत्थाय अभ्यङ्गस्नानं समाचरन्ति। अनन्तरं नूतनवस्त्राणि परिधारयन्ति मिष्टान्नानि खादन्ति च। महिलाः रङ्गवल्लिभिः दीपानां आवलीभिः गृहद्वाराणि भूषयन्ति। जनाः आकाशदीपेन तथा दीपमालया स्वगृहाणि भूषयन्ति। बालकाः स्फोटकानां स्फोटनं कुर्वन्ति। सर्वे परस्परं मिलित्वा मङ्गलकामनां कुर्वते।

सर्वेषाम् आबालवृद्धानां सधनानां निर्धनानां च कृते एषः आनन्दोत्सवः खलु। मह्यमपि दीपावली अतीव रोचते।

४. **मकरसंक्रमणोत्सवः।**

प्रतिवर्षं जानेवारी मासस्य चतुर्दशे दिने भारतीयाः मकरसंक्रमणोत्सवः उत्साहेन सम्पादयन्ति। अस्मिन् दिने सूर्यः मकरराशौ प्रविशति। एतद् 'उत्तरायणम्' इति उच्यते।

एषः पर्वकालस्य दिवसः। पौषमासे शीतसमयः वर्तते। एतस्मिन् दिवसे जनाः कृष्णवर्णस्य वस्त्राणि परिधारयन्ति। तिलगुडयोः च आदानप्रदानं कुर्वन्ति। तथा 'मधुरं वदत' इति परस्परान् स्नेहेन आह्वयन्ति। गृहे गृहे महिलाः तिलगुडयोः मिष्टान्नानि अपि पचन्ति।

सर्वे जनाः सम्मिल्य स्नेहं वर्धयन्ति सर्वेषां सुखं कामयन्ते च।

५. **होलिकोत्सवः।**

फाल्गुनपौर्णिमायां होलिकोत्सवः सम्पद्यते। दिनद्वयात्मकः एषः उत्सवः। प्रथमे दिने जनाः एकं गर्तं खनन्ति। तस्मिन् शुष्काणि काष्ठानि रचयित्वा होलिकां प्रज्वालयन्ति। तस्याः पूजां कुर्वन्ति। तस्यै नैवेद्यं समर्पयन्ति। होलिका देवी सर्वाणि दुरितानि नाशयति इति तेषां मतिः।

द्वितीये दिने धूलिवन्दनं भवति। तद् 'रङ्गपञ्चमी' इत्यपि उच्यते। अस्मिन् दिने सर्वे परस्परेषु रङ्गान् क्षिपन्ति। अतः बालकेभ्यः एषः उत्सवः अतीव रोचते।

६. **विजयादशमी।**

अश्विनमासस्य शुद्धदशमी 'विजयादशमी' नाम्ना प्रसिद्धा। एतद् नवरात्रोत्सवस्य चरमं दिनम्। अस्मिन् उत्सवे शस्त्राणि, यन्त्राणि वाहनानि च पूज्यन्ते। सर्वे छात्राः सरस्वतीपूजनम् अपि कुर्वन्ति।

गृहे गृहे मिष्टान्नभोजनं पच्यते। सर्वे नूतनवस्त्राणि धारयन्ति। द्वाराणि तोरणैः अलङ्कुर्वन्ति। जनाः 'अश्मन्तक' (आपटा) इति वृक्षस्य पर्णानि परस्परेभ्यः दत्त्वा मङ्गलकामनां कुर्वन्ति। नूतनकार्यस्य प्रारम्भः अस्मिन् दिने क्रियते।

अस्मिन्नेव दिने रामेण रावणः हतः। अतः स्थाने स्थाने जनाः रावणदहनं कुर्वन्ति। तेन अनिष्टं नश्यते इति तेषां मतिः।

७. **स्वातन्त्र्यदिवसोत्सवः।**

सप्तचतुर्नवैकतमे (१९४७) ख्रिस्ताब्दे ऑगस्टमासस्य पञ्चदशे (१५) दिनाङ्के भारतदेशः आङ्ग्लशासनात् मुक्तः अभवत्। अतः एषः अस्माकं स्वातन्त्र्यदिवसः। अस्मिन् दिवसे प्रतिनगरं, पाठशालासु च ध्वजारोहणं भवति। ध्वजवन्दनं कृत्वा सर्वे राष्ट्रगीतं देशभक्तिगीतानि च गायन्ति। एषः राष्ट्रीयः अवकाशदिवसः।

शूराः देशभक्ताः आङ्ग्लशासनस्य विरुद्धं संग्रामं कृतवन्तः। स्वातन्त्र्यस्य कृते तैः स्वजीवितमपि समर्पितम्। स्वातन्त्र्यं प्राप्य अर्धशतकादपि अधिकः कालः गतः। तेषां वीराणां त्यागः अस्माभिः न विस्मर्तव्यः। तैः सम्पादितं स्वातन्त्र्यं रक्षितव्यम्। दुर्मतिनः परस्परं भेदान् जनयित्वा राष्ट्रस्य खण्डनं कुर्वन्ति, तद् न सहितव्यम्। ऐक्यभावे रक्षिते स्वातन्त्र्यस्य रक्षणं भवति। तदैव अस्माकं देशः उत्कर्षं श्रेष्ठत्वं च गमिष्यति।

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी।
देशोऽयं क्षोभरहितः सज्जनाः सन्तु निर्भयाः।।
।। वन्दे मातरम् ।।

८. **शिक्षकदिनम्।**

• प्रतिवर्षं सप्टेम्बरमासस्य पञ्चमे दिने अस्माकं देशे शिक्षकदिनं सम्पद्यते। एतद् डॉ. सर्वपल्ली राधाकृष्णन्महोदयस्य जन्मदिनम्। भारतस्य एषः द्वितीयः राष्ट्रपतिः प्रज्ञावान् अध्यापकः अपि आसीत्।

नैकासु पाठशालासु शिक्षकदिनसमारोहस्य आयोजनं क्रियते। तस्मिन् कार्यक्रमे छात्राः भाषणानि कुर्वन्ति। शिक्षकान् प्रति आदरं प्रकटयन्ति। अनन्तरं केचन छात्राः कक्षासु अन्यछात्रान् पाठयित्वा शिक्षकान् तोषयन्ति। सर्वे छात्राः शिक्षकेभ्यः पुष्पाणि दत्त्वा नमस्कुर्वन्ति।

तदा प्रार्थयन्ते –

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।
गुरुः साक्षात्परब्रह्म तस्मै श्रीगुरवे नमः।।

९. **गणतन्त्रदिनम्।**

प्रतिवर्षं जानेवारीमासस्य षड्विंशतितमे दिनाङ्के वयं भारतीयाः गणतन्त्रदिनं सम्पादयामः। स्वातन्त्र्यात् अनन्तरम् एतस्मिन्नेव दिने भारतदेशः प्रजासत्ताकं राज्यं सञ्जातम्। जनहितार्थं जनैः निर्मितं जनशासनमेव एतत्। अतः सर्वे भारतीयाः राष्ट्रध्वजारोहणाय सम्मिलन्ति।

एषः अस्माकं राष्ट्रीय उत्सवः। अस्मिन् समारोहे राष्ट्रपतिमहोदयानां हस्तेन वीरबालकेभ्यः, शास्त्रज्ञेभ्यः, क्रीडापटुभ्यः कलावद्भ्यः च पारितोषिकाणि समर्प्य तेषां सत्कारः क्रियते। छात्राः गणतन्त्रस्य तथा राष्ट्ररक्षणस्य कृते प्रतिज्ञां कुर्वन्ति। अनन्तरं सर्वे राष्ट्रगीतं गायन्ति। अनेन उत्सवेन प्रजासु एकता देशभक्तिः च वर्धते।

विश्वे विजयतां मे भारतस्य प्रजातन्त्रम्।

१०. **नूतनवर्षारम्भोत्सवः।**

चैत्रमासस्य शुद्धप्रतिपदायां नूतनवर्षारम्भः मान्यते। जनाः प्रभाते अतिशीघ्रम् उत्थाय नववर्षस्य स्वागतमिव व्याहरन्ति। द्वाराणि तोरणैः अलङ्कुर्वन्ति। रङ्गवल्लीः आलिखन्ति। एकस्मिन् काष्ठस्य अग्रे नूतनवस्त्रं, कलशं तथा पुष्पमालां निधाय प्रवेशद्वारे स्थापयन्ति।

अस्मिन् मङ्गलदिने गृहे गृहे मिष्टान्नभोजनं पच्यते। नवकार्यस्य शुभारम्भः क्रियते। नववर्षस्य कृते प्रत्येकः जनः मनसि कमपि शुभसङ्कल्पं करोति। सर्वे परस्परं मिलित्वा सुखस्य कृते मङ्गलकामनां कुर्वन्ति।

वयमपि कामयामहे यत् आगामिनि वर्षे –

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी।
देशोऽयं क्षोभरहितः सज्जनाः सन्तु निर्भयाः।।

११. **धर्मचक्रप्रवर्तनदिनोत्सवः।**

भगवान् गौतमबुद्धः वैशाखपौर्णिमायां गयास्थाने ज्ञानं प्राप्तवान्। सारनाथस्थाने तेन तद् ज्ञानं धर्मप्रवचनरूपेण तस्य शिष्येभ्यः दत्तम्। तत् प्रथमं धर्मप्रवचनं 'धर्मचक्रप्रवर्तनम्' इति उच्यते।

अनन्तरं १९५६ ख्रिस्ताब्दे विजयादशम्यां डॉ. बाबासाहेब आम्बेडकरमहोदयः नागपूरनगरे बौद्धधर्मं स्वीकृतवान्। एतद् दिनं धर्मचक्रप्रवर्तनदिनरूपेण सम्पद्यते। एतत् स्थानं दीक्षाभूमिः नाम्ना प्रसिद्धम्। अस्मिन् दिने तस्य लक्षपरिमिताः अनुयायिनः दीक्षाभूमिं गत्वा तं स्मरन्ति। तत्र नैकाः धार्मिकाः कार्यक्रमाः सम्पद्यन्ते। जनाः परस्परान् मिलित्वा विचाराणाम् आदानप्रदानं कुर्वन्ति।

अनेन उत्सवेन परस्परसामञ्जस्यं, सौहार्दं सामाजिक-एकता च वर्धन्ते।

१२. **ईदोत्सवः।**

'ईदोत्सवः' इति अस्माकं मुस्लिमबान्धवानां प्रमुखः उत्सवः। रमजानमासे जनाः धार्मिकाचरणम् आचरन्ति। केचन जनाः कठिनं निर्जलम् उपवासव्रतम् अनुतिष्ठन्ति। रमजानमासस्य अन्ते शव्वालमासस्य प्रथमे दिने ईदोत्सवः मान्यते। एषः उपवाससमापनस्य दिनः इति ख्यातः।

जनाः प्रातः अतिशीघ्रम् उत्थाय मसीतिं गत्वा प्रार्थनां कुर्वन्ति। अनन्तरं परस्परान् आलिङ्गन्ति मङ्गलकामनां च कुर्वन्ति। ज्येष्ठाः बालकेभ्यः उपहारान् यच्छन्ति। दीनेभ्यः दानं दीयते। सर्वत्र आनन्ददायकं वातावरणं भवति।

१३. **मैत्रीदिनोत्सवः।**

ऑगस्ट-मासस्य प्रथमे रविवासरे मैत्रीदिनोत्सवः सम्पद्यते। अस्मिन् दिने मित्रैः परस्परहस्ते मैत्रीसूत्रं बध्यते। मित्रम् अस्माकं जीवनस्य अविभाज्यम् अङ्गमेव वर्तते। जीवने मित्रस्य आवश्यकता सदैव भवति। मित्राणां सहवासे वयम् आनन्देन कालं नयामः। धनस्य सङ्ग्रहादपि मित्राणां सङ्ग्रहः मूल्यवान् खलु। सन्मित्राणां नैकानि लक्षणानि सुभाषितकारैः वर्णितानि। 'प्राणपणेनापि रक्षणीयाः सुहृदासवः' एषा लोकोक्तिः मित्रस्य अतुल्यं महत्त्वं प्रतिपादयति।

अतः जीवने सुखं, आनन्दं, यशः प्राप्तुं सर्वैः मित्राणां सङ्ग्रहः कर्तव्यः एव। उच्यते खलु,

तदेवास्यं परं मित्रं यत्र सङ्क्रामति द्वयम्।
दृष्टे सुखं च दुःखं च प्रतिच्छायेव दर्पणे।।

१४. **बालकदिनम्।**

नोव्हेम्बरमासस्य चतुर्दशे दिनाङ्के बालकदिनं सम्पद्यते। जवाहरलाल-नेहरुमहोदयः अस्माकं प्रथमः प्रधानमन्त्री। तस्मै बालकाः अतीव अरोचन्त। बालकाः तं प्रेम्णा 'चाचा-नेहरु' इति समबोधयन्। अतः तस्य जन्मदिनं बालदिनम् इति मान्यते।

एतस्मिन् दिने नैकाः संस्थाः बालकानां कृते विविधकार्यक्रमाणाम् आयोजनं कुर्वन्ति। तेषु मिष्टान्नानि वितरन्ति। शालासु अपि सांस्कृतिककार्यक्रमाः सम्पद्यन्ते। नैकाः स्पर्धाः क्रीडाप्रकाराः च आयोजिताः भवन्ति।

'बालकाः धनं राष्ट्रस्य' इति उच्यते। तेषां संरक्षणं संवर्धनं च अस्माभिः कर्तव्यम्।

## विज्ञानविषयकाः।

१. **सङ्गणकः।**

विज्ञानतन्त्रज्ञानस्य महत्त्वपूर्णाविष्कारः नाम 'सङ्गणकः'। सङ्गणकः विविधाः गणनक्रियाः सत्वरं करोति। सः कुशलः अनुवादकः अपि।

सङ्गणकः मानवानां महान् सुहृद् खलु। विमानचालकानां, नौकाचालकानां चिकित्सकानां च सः सहायकः। सङ्गणकस्य कार्यम् अनन्तं विद्यते। सर्वकार्यालयेषु, यन्त्रशालासु, पाठशालासु सर्वत्र च सङ्गणकस्य उपयोगः क्रियते। अधुना गृहे गृहे सङ्गणकः वर्तते। अन्तरिक्षगमनार्थम् अतिसूक्ष्मगणनाः अपि सः कर्तुं क्षमः।

संस्कृतभाषा सङ्गणकस्य कृते उपयुक्ता इति मन्यते। केचन जनाः सङ्गणकस्य दुरुपयोगान् अपि कुर्वन्ति। अतः अस्माभिः एतस्य यन्त्रस्य सदा विवेकी उपयोगः कर्तव्यः।

२. **दूरदर्शनम्।**

दूरदर्शनं नाम अधुना प्रत्येकस्य गृहस्य अविभाज्यम् अङ्गमेव जातम्। एतत् मनोरञ्जनस्य उत्तमं साधनं खलु। दूरदर्शने छात्राणां कृते, महिलानां कृते, कृषकाणां कृते नैकाः विविधाः कार्यक्रमाः विद्यन्ते। ते न केवलं मनोरञ्जकाः अपि तु ज्ञानदायकाः अपि। तस्मिन् वार्ताप्रसारणं विज्ञापनप्रसारणं च भवति।

एतस्य माध्यमेन वयं सुखेन गृहे उपविश्य परदेशस्थानि स्थलानि, क्रीडास्पर्धाः तथैव कार्यक्रमाः च द्रष्टुं शक्नुमः। एते दूरदर्शनस्य लाभाः। किन्तु यदा छात्राः अभ्यासं स्वकार्याणि च त्यक्त्वा दूरदर्शनसञ्चस्य पुरतः उपविशन्ति तदा तस्य परिणामाः हानिकारकाः एव। अतः एतस्य विज्ञानतन्त्रज्ञानस्य सदा विवेकी उपयोगः कर्तव्यः।

३. **आकाशवाणी।**

'आकाशवाणी' नाम विज्ञानस्य महाविष्कारेषु एकः। इदं मनोरञ्जनस्य तथा शिक्षणस्यापि महत्त्वपूर्णं साधनमस्ति। एतेन वयं नैकान् कार्यक्रमान् आकर्णयामः।

आकाशवाणी अस्मान् विविधानां गायकानां मधुराणि गीतानि श्रावयति। आकाशवाण्या विविधानि नाटकानि अपि प्रक्षेपितानि भवन्ति। तत्र छात्राणां कृते मार्गदर्शनस्य कार्यक्रमाः भवन्ति। नारीणां कृते कार्यक्रमाः आयोजिताः सन्ति। कृषकाणां उद्बोधनार्थं कार्यक्रमाः प्रसृताः भवन्ति। अनया सततं विविधाः वार्ताः अधिगम्यन्ते।

किन्तु अधुना गृहे गृहे दूरदर्शनसञ्चः सङ्गणकः च दृश्येते। तस्मात् आकाशवाण्याः उपयोगः न्यूनः जातः इति मन्ये।

४. **अवकाशयानम्।**

इदं विज्ञानयुगम्। विज्ञानं मानवानां तृतीयं लोचनं खलु। 'अवकाशयानं' नाम विज्ञानस्य महाविष्कारेषु एकः।

अग्निबाणस्य साहाय्येन अवकाशयानस्य प्रक्षेपणं भवति। पृथिव्याः कक्षायाः बहिः गत्वा अवकाशयानं अन्तरिक्षे भ्रमणं करोति। कस्मिंश्चित् अवकाशयाने मानवाः सन्ति। ते खगोलानां छायाचित्रणं कुर्वन्ति। नैकानां प्रश्नानां उत्तराणि प्राप्तुं ते प्रयतन्ते।

मानवैः चन्द्रे पदं न्यस्तम्। अधुना मङ्गलग्रहमपि गन्तुं मानवाः उत्सुकाः।

५. **भ्रमणध्वनिः।**

विज्ञानतन्त्रज्ञानस्य महत्त्वपूर्णः आविष्कारः नाम भ्रमणध्वनिः। तस्य साहाय्येन भ्रमणं कुर्वन् मानवः दूरस्थेन जनेन सह वार्तालापं कर्तुं प्रभवति। तेन जनानां सर्वमपि कार्यं सुकरं भवति। भ्रमणध्वनिः सङ्गणकरूपेणापि उपयुज्यते। तेन छायाचित्रणम् अपि शक्यं वर्तते।

अधुना जनाः भ्रमणध्वनिं हस्तात् न मुञ्चन्ति एव। मार्गे चलन्तः ते सम्भाषणं कुर्वन्ति। तेन नैके अपघाताः भवन्ति। अतः अस्माभिः तस्य विवेकी उपयोगः करणीयः।

## आणखी काही अन्य विषयांवरील निबंध

१. **मम माता।**

'ईश्वरः सर्वत्र गन्तुं न शक्नोति, अतः तेन माता निर्मिता' – इति उच्यते। मम कृते मे माता एव मम विश्वम्। तस्याः नाम ____ इति। मम जननी सुसंस्कृता। नित्यं प्रसन्नवदना। सा मधुरभाषिणी। पाककलानिपुणा सा सर्वेषां कृते अतीव श्राम्यति। अध्ययने मम

साहाय्यं करोति। क्वचिद् मह्यं कुप्यति अपि। किन्तु तत् मम हिताय एव। अहं सुसंस्कृतः भवेयं, यशस्वी भवेयम् इति तस्याः ध्येयम्। अतः सा मम दोषान् दर्शयित्वा तेषां निराकरणं करोति।

तस्याः स्नेहातिशयेन अस्माकं गृहं व्याप्तम्। यथार्थमेव उच्यते यत् –

जनन्येव मनुष्याणां दैवतं परमं स्मृतम्।
तस्याः शुभाशिषा सर्वे विन्दन्ति स्वं सुखं च शम्।।

## २. नदी।

नदी पर्वतात् प्रभवति सागरं प्रति गच्छति। अतः सा गिरिकन्या सागरकान्ता च। नद्याः जलं जीवनं खलु। तं परितः प्रदेशाः सस्यश्यामलाः सुजलाः सुफलाः भवन्ति। नदीतटयोः तीर्थक्षेत्राणि सन्ति। न केवलं मानवाः अपि तु सर्वे पशवः खगाः अपि तस्याः जलं पिबन्ति। अधुना नदीप्रवाहम् अवरुध्य विद्युन्निर्मितिः अपि क्रियते।

किन्तु केचन जनाः नदीजलं प्रदूषितं कुर्वन्ति। तत्र वस्त्राणि पात्राणि च क्षालयन्ति। जले त्याज्यानि वस्तूनि रसायनानि च क्षिपन्ति। एतत् न कर्तव्यम्। नदी उपकारिणी खलु। तस्याः रक्षणं कर्तव्यम्। सत्यं खलु –

"जीवनं स्वं परार्थाय नित्यं यच्छत मानवाः।
इति सन्देशमाख्यातुं समुद्रं यान्ति निम्नगाः।।"

## ३. सूर्यः।

सूर्यः गगनस्य अलङ्कारः। सः स्वयंप्रकाशी तेजोगोलः। एषः दिवाकरः प्रतिदिनं प्रभाते पूर्वदिशि उदेति। एषः ऊर्जायाः स्रोतः। जगते सः प्रकाशम् उष्णतां च यच्छति।

तस्य किरणैः एव सागरजलस्य बाष्पं भवति। तद् मेघः भूत्वा पर्जन्यं वर्षयति। तेन च सर्वे सजीवाः जीवन्ति। पुराणे वर्णनं अस्ति यत् सूर्यस्य रथस्य एकमेव चक्रम् अस्ति। विकलाङ्गः अरुणः तस्य सारथिः अस्ति। सूर्यस्य रथस्य सप्त अश्वाः विद्यन्ते। सर्वे ग्रहाः सूर्यं परितः भ्रमन्ति। सत्यम् उक्तं खलु –

आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर।
दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तु ते।।

## ४. कृषीवलः।

अस्माकं भारतदेशः कृषिप्रधानः। बहवः जनाः कृषिकार्ये निमग्नाः दृश्यन्ते। कृषीवलस्य जीवनम् अतीव श्रमपूर्णम्। सः आदिनं क्षेत्रे श्राम्यति। सूर्यस्य आतपं, पर्जन्यं शैत्यं च अविगणय्य सः श्रमान् करोति। धान्योत्पादनेन सः राष्ट्रस्य पोषणं करोति।

अधुना कृषिमहाविद्यालये कृषकाणां कृते शिक्षणं भवति। अतः ते सुशिक्षिताः विज्ञानप्रियाः जाताः। तज्ज्ञैः कृतं संशोधनं, नवनिर्मितानि यन्त्राणि तैः प्रयुज्यन्ते। अधिकतरं धान्यं प्राप्तुं ते प्रयतन्ते।

वयं कृषकस्य उपकारान् कदापि न विस्मरेम।

## ५. मयूरः।

सर्वखगेषु मयूरः अतीव रम्यः खगः। तस्य कण्ठः नीलः अतः सः नीलकण्ठः उच्यते। मयूरस्य कलापः विविधवर्णयुक्तः मनोहरः च। यदा आकाशे कृष्णमेघाः आगच्छन्ति तदा सः कलापं प्रसार्य आनन्देन नृत्यति। तस्य मस्तके शिखा मुकुटः इव राजते। तस्य केका प्रसिद्धा।

मयूरः विद्यादेवतायाः शारदायाः वाहनम् अस्ति। एषः सुन्दरः विहगः मयूरः एव अस्माकं राष्ट्रीयः खगः। तर्हि अस्माभिः तेषां संरक्षणं कर्तव्यम् एव। एकां प्रहेलिकायां तस्य वर्णनं कृतम् अस्ति यत् –

पश्चाद् बर्हं वहति विपुलं चित्रितं दीप्तिमन्तुम्
काले काले व्यजनमिव तं विस्तृतं यः करोति।
शीर्षे कान्तं वहति तरलं पिच्छकानां कलापम्
कोऽयं पक्षी रुचिरवदनो नर्तने च प्रवीणः।।

६. ## अश्वः।

'अश्वस्य भूषणं वेगः' इति कथ्यते। अश्वस्य वेगः अतुलनीयः खलु। सः सबलः तथापि विनीतः पशुः। जनाः अश्वशक्तिम् एव प्रमाणयन्ति।

तस्मै चणकाः रोचन्ते। तस्य दीर्घा ग्रीवा अभिरामा। अश्वानां विविधाः वर्णाः। केचित् कृष्णाः केचित् शुभ्राः कपिलाः च। जनाः अश्वान् पालयन्ति। पुरा नृपाः विहारार्थं मृगयार्थं च अश्वान् उपयुञ्जते स्म। सङ्ग्रामे अपि ते उपयुक्ताः आसन्। सः अतीव विश्वसनीयः स्वामिनिष्ठः च पशुः।

कश्चित् कविः अश्वप्रशंसायाम् एवं निवेदयति –

"अश्वा यस्य जयः तस्य यस्याश्वाः तस्य मेदिनी।
अश्वा यस्य यशः तस्य यस्याश्वाः तस्य काञ्चनम्।।"

७. ## व्यायामस्य महत्त्वम्।

'शरीरमाद्यं खलु धर्मसाधनम्' इति सत्यमेव उक्तम्। अतः शरीरं सुदृढं कर्तुं व्यायामः आवश्यकः। व्यायामेन बलं वर्धते। तेन आरोग्यमपि वर्धते। शरीरं चपलं भवति।

व्यायामेन मनुष्यः प्रसन्नः भवति। तस्य क्षुधा वर्धते। अन्नस्य पचनम् अपि शीघ्रं भवति। नैके व्यायामप्रकाराः जनैः क्रियन्ते। केचन जनाः प्रतिदिनं प्रभाते धावन्ति। केचन जलतरणं कुर्वन्ति। केचन सूर्यनमस्कारान् योगासनान् च अनुतिष्ठन्ति। तेन शरीरं व्याधिमुक्तं भवति।

व्यायामस्य महत्त्वं एकस्मिन् श्लोके वर्णितं भवति,

तद्यथा –

लाघवं कर्मसामर्थ्यं स्थैर्यं क्लेशसहिष्णुता।
दोषक्षयोऽग्निवृद्धिश्च व्यायामादुपजायते।।

८. ## उद्यानम्।

उद्यानं नगरस्य भूषणमेव। तत्र नैके फलपुष्पयुताः वृक्षाः शोभन्ते। विविधाः लताः दृश्यन्ते। तासु विविधानि पुष्पाणि विलसन्ति। तेषु भ्रमराः मधुपानं कुर्वन्ति। वृक्षेषु वसन्तः खगाः मधुरं कूजन्ति।

कुत्रचित् उद्यानस्य मध्ये तडागः अस्ति। तस्मिन् कमलानि विकसन्ति। जलधारायन्त्रं जलम् उत्सृजति। उद्याने बालकाः क्रीडन्ति। नागरिकाः विहारार्थम् आगच्छन्ति। जनाः तत्र विश्रान्तिसुखम् अनुभवन्ति। जनैः उद्यानस्य रक्षणम् अवश्यं कर्तव्यम्।

९. ## वृत्तपत्राणि।

वार्ताप्रसारार्थं ज्ञानप्रसारार्थं च वृत्तपत्राणां महत्त्वम् अनतिसाधारणम्। अद्यतनयुगे दूरदर्शने, आकाशवाण्याम्, अन्तर्जाले च आदिनं सद्यस्कालीनाः वार्ताः लभ्यन्ते। तथापि वृत्तपत्राणां पठने यत् सुखं सन्तोषं च अनुभूयते तद् अवर्णनीयम्।

प्रतिदिनं प्रातःकाले जनाः वृत्तपत्राणां प्रतीक्षां कुर्वन्ति। तानि विविधासु भाषासु उपलभ्यन्ते। राजकीयक्षेत्राणां वार्ताः, औद्योगिकक्षेत्राणां वार्ताः, आर्थिकविषयाः च तत्र प्रकाशिताः भवन्ति। तथैव संशोधनविषयाः, क्रीडावार्ताः, मनोरञ्जनविषयाः चापि जनानां प्रबोधनं कुर्वन्ति। केचन जनाः प्रतिदिनं शब्दरञ्जनीभ्यः प्रहेलिकाभ्यः च स्पृहयन्ति। एवं यः यत् कामयते, तद् सः वृत्तपत्रे लभते।

वृत्तपत्राणि जनमतस्य प्रतिबिम्बानि एव। लोकतन्त्रस्य रक्षणं जनजागरणं च तेषां प्रमुखं कार्यम्। वृत्तपत्राणि खलु लोकमित्राणि एव।

१०. ## रक्षाबन्धनम्।

श्रावणमासस्य शुद्धपक्षे पौर्णिमायां जनाः रक्षाबन्धनस्य उत्सवं सम्पादयन्ति। अस्मिन् दिने भगिनी स्वबन्धोः हस्ते मणिबन्धे रक्षासूत्रं बध्नाति तं नीराजयते च। भ्राता अपि तस्यै उपहारं ददाति। तस्याः रक्षणम् आश्वासयति च। एतस्य उत्सवस्य नैकाः ऐतिहासिककथाः तथा च पौराणिककथाः प्रचलिताः।

अस्मिन् दिने धीवराः सागरं पूजयन्ति। तस्मै नारिकेलफलम् अर्पयन्ति। गृहे गृहे नारिकेलमिष्टान्नानि पच्यन्ते। मह्यम् एषः उत्सवः अतीव रोचते।